International Theatre Institute
World Organization for the Performing Arts
Indian Centre of ITI

IAPAR
INTERNATIONAL ASSOCIATION FOR PERFORMING ARTS AND RESEARCH

विश्वनाट्यकलादिवसोत्सवमधिकृत्य नॉर्वेदेशस्थितस्य नाटककारस्य
जॉन फॉसे महोदयस्य नाट्यप्रेमिजनाभिमुखः सन्देशः। (ख्रिस्ताब्द २०२४)

## शान्तिस्वरूपैव कला।

जनस्य प्रत्येकस्यानन्यसाधारणत्वेपि अन्येषां सर्वेषां साधर्म्यमपि दृश्यते। अस्माकं दृश्यमानं बाह्यरूपं भवति सर्वेभ्यो भिन्नं। तत्सुष्ठु एव। प्रत्येकस्यान्तश्च वर्तते किञ्चित्, यत्तस्य जनस्यैवाधीनम्। तस्य जनस्य स्वत्त्वं वाऽत्मा वेति तत्तत्त्वमभिज्ञायतेऽस्माभिः । नामरुपेण तत्तत्त्वं नैव वा व्यवच्छेद्यमिति मन्यन्ते केचन। तदपि साधु। एवं सत्यपि वर्तते ध्रुवं स्थल-भाषा-वर्णभेदेभ्यः परं मानुषं साधर्म्यमपि सर्वेषाम्।

विरोधाभास एवैषः यत्सर्वेऽपि वयं परस्परसमाः परस्परासमाश्च स्मः। अपि तु यदानुध्यायाम तद्गम्यते ईदृशो विरोधाभासः मनुष्यस्वभावविशिष्ट एव । शरीरात्मयोर्यो बन्धोऽस्माभिः कल्पितः तद्योगेन पार्थिवः इन्द्रियगोचरो भावः अगोचरेण निस्त्रैगुण्येन सता बध्यते। तथैव प्रवरा कला मनुष्याणां यत्सार्वजनीनमसाधारणं च यत्तत्संभृत्य युनक्ति। तेन विद्मः किं विशिष्टं, किं वा निष्ठ्यम् किं च सर्वसाधारणमिति। अनुदीर्यन्ते कलाभावेन सर्वेऽपि सीमाः - भाषाणाम् प्रदेशानां राष्ट्राणामपि। किन्तु नैतत्कदाप्यवगन्तव्यं यत्कला वैविध्यम् सर्वमपाकरोति भेदान् वा समीकरोति । प्रत्युत वैविध्यम् वैशिष्ट्यं च सम्यक् निर्दिश्यते तया। सर्वेप्युत्तमाः कलाविष्काराः नवतां दर्शयन्ति किञ्चिदद्यावध्यनभिज्ञं ज्ञापयन्ति च। वर्तते किञ्चिद्गुह्यम् चित्ताकर्षकम् कलाभिव्यक्तिषु येन वयं स्वरचिताः सीमाः लङ्घयितुं क्षमाः । स एव कलाश्रितः परमार्थो यं प्रति कलाऽस्मान्नयेत्।

न जाने कमप्यन्योपायं येनापरेतराः युज्यन्ते। अद्य जगति जनैः वैविध्यम् न सानन्दं स्वीक्रियते अपि तु तद्विद्वेषजनकम् हिंसायाः कारणमेवेति सर्वथानुदृश्यते। तदर्थं प्रायशोऽधुनिकानि प्रौद्योगिकीयान्युपकरणानि प्रयुज्यन्ते। यत्किञ्चिदज्ञातं परकीयम् वा, न तदुत्साहवर्धकमपि तु निर्भर्त्सकं भयकारकमेव वेति मन्यन्ते बहवो जनाः। तस्मादेव कारणाद्वर्तन्ते विश्वेस्मिन् भयावहोऽतङ्कः महद्विनाशकारीणि युद्धानि च । यदि किञ्चिद्गम्यते धर्मबाह्यम् कस्यचिद्राजनैतिको दृष्टिकोणो वा गम्यते भिन्नः तर्हि तस्य विनाश एव कर्तव्यः इति मन्यन्ते ईदृशाः जनाः। अमुथैव विविधतायाः निराकरणं सर्वस्य च नीरसीकरणम् भवति।

युद्धं नाम स्वत्त्वविरोधः विविधतायाः विशेषतायाः विरोधश्च। सकलकलानां कलागर्भस्य च सुन्दरस्य विरोधः युद्धम्।

अत्राहं सामान्यतया सकलकलाप्रकारान् अधिकृत्य वच्मि न केवलं नाट्यविषये, नाट्यलेखनविषये वा। तद्यतो हि सर्व एव कलाभिव्यक्तयः मूलतः एकमेवार्थाः। स चार्थो नाम पिण्डनिहितस्यानन्यसाधारणस्य तत्त्वस्य सत्यार्थेन वैश्विकीकरणम्। न वैविध्यस्यास्वीकरणम् न वा नाशः अपि तु अपरेतरयोः देदीप्यमानः संयोगः।

युद्धं कला च विपरीतौ, यथा युद्धं शान्तिश्च विपरीतौ स्तः—इदं तावत् सरलम् । कला एव शान्तिः।
शान्तिस्वरूपैव कला।

**इत्यवोचत्  जॉन फॉसे महोदयः ।**

**आङ्ग्लानुवादकर्ता - डेमिअन सर्ल्स महोदयः**

**आङ्ग्लानुवादानुसारी संस्कृतानुवादः ऋचा मुळे इत्यनया कृतः ।**

---

International Theatre Institute / World Theatre Day Message 2024

**Jon FOSSE, Norwegian writer, playwright, Norway.**
Sanskrit Translation) – Rucha Mulay, India